विकृताकुलनीलभासः प्रम्लानरागलुलिताः कलुषा विरूपाः । तेजोऽतिदीप्तिकुलपुष्टिविहीनवर्णाः कर्केतनस्य सदृशं वपुरुद्वहन्ति । कर्केतनं यदि परीक्षितवर्णरूपं प्रत्यग्रभास्वरदिवाकरसुप्रकाशम् । तस्योत्तमस्य मणिशास्त्रविदा महिम्ना तुल्यन्तु मूल्यमुदितं तुलितस्य कार्य्यम्” ७५अ०

**कर्कोट(क)** पु० कर्क—ओट । १नागभेदे स च अष्टनागान्तर्गतः । “अनन्तोवासुकिः पद्मो महापद्मोऽपि तक्षकः । कर्कोटः कुलिकः शङ्ख इत्यष्टौ नागनायकाः” त्रिका० । ति०त० पुराणान्तरे गारुड़े च द्वितीयार्द्धे “कुलिकः कर्कटः शङ्ख इति पाठः । अयञ्च नागपञ्चम्यां पूज्यः यथाह तत्रैव । “शेषः पद्मो महापद्मः कुलिकः शङ्खपालकः । वासुकिः शङ्खकश्चैव कालियो मणिभद्रकः । ऐरावतो धृतराष्ट्रः कर्कोटकधनञ्जयौ” इति । अयञ्च कद्रूपुत्रभेदः । “शेषः प्रथमतोजातोवासुकिस्तदनन्तरम् । ऐरावतस्तक्षकश्च कर्कोटकधनञ्जयौ” भा० आ० ३५अ० नागनामकथने । कर्कोटकनागस्य नारदशापेन जडताप्राप्तिकथा नलेन सह संवादश्च भा० व० ६६अ०

“उत्सृज्य दमयन्तीन्तु नलो राजा विशाम्पते ! । ददर्श दावं दह्यन्तं महान्तं गहने वने । तत्र शुश्राव शब्दं वै मध्ये भूतस्य कस्यचित् । अभिधाव नलेत्युच्चैः पुण्यश्लोकेति चासकृत् । मा भैरिति नलश्चोक्त्वा मध्यमग्नेः प्रविश्य तम् । ददर्श नागराजानं शयानं कुण्डलीकृतम् । स नागः प्राञ्जलिर्भूत्वा वेपमानो नलन्तदा । उवाच विद्धि मां नाम्ना नागं कर्कोटकं नृप ! । मया प्रलब्धो ब्रह्मर्षिर्नारदः सुमहातपाः । तेन मन्युपरीतेन शप्तोऽस्मि मनुजाधिप ! । तिष्ठ त्वं स्थावर इव यावदेव नलः क्वचित् । इतो नेता हि तत्र त्वं शापान्मोक्ष्यसि मत्कृतात् । तस्य शापान्न शक्नोमि पदाद्विचलितुं पदम् । उपदेक्ष्यामि ते श्रेयस्त्रातुमर्हति मां भवान् । सखा च ते भविष्यामि मत्समो नास्ति पन्नगः । लघुश्च ते भविष्यामि शीघ्रमादाय गच्छ माम् । एवमुक्त्वा स नागेन्द्रो बभवाङ्गुष्ठमात्रकः । तं गृहीत्वा नलः प्रायाद्देशं दावविवर्जितम् । आकाशदेशमासाद्य विमुक्तं कृष्णवर्त्मना । उत्स्रष्टुकामं तं नागः पुनः कर्कोटकोऽब्रवीत् । पदानि गणयन् गच्छ स्वानि नैषध ! कानिचित् । तत्र तेऽहं महाबाहो ! श्रेयो धास्यामि यत् परम् । ततः सङ्ख्यातुमारब्धमदशद्दशमे पदे । तस्य दष्टस्य रूपं तत् क्षिप्रमन्तरधीयत । स दृष्ट्वा विस्मितस्तस्थावात्मानं विकृतं नलः । स्वरूपधारिणं नागं ददर्श स महीपतिः । ततः कर्कोटको नागः सान्त्वयन् नलमब्रवीत् । मया तेऽन्तर्हितं रूपं न त्वां विद्युर्जना इति । यत्कृते चासि निकृतो दुःखेन महता नल ! । विषेण स मदीयेन दुःखं त्वयि निवत्स्यति । विषेण संवृतैर्गात्रैर्यावत्त्वां न विमोक्ष्यति । तावत्त्वयि महाराज ! दुःखं वै स निवत्स्यति । अनागा येन निकृतस्त्वमनर्हो जनाधिप ! । क्रोधादसूययित्वा तं रक्षा मे भवतः कृता । न ते भयं नरव्याघ्र ! दंष्ट्रिभ्यः शत्रुतोऽपि वा । ब्रह्मविद्भ्यश्च भविता मत्प्रसादान्नराधिप ! । राजन् ! विषनिमित्ता च न ते पीड़ा भविष्यति । संग्रामेषु च राजेन्द्र ! शश्वज्जयमवाप्स्यसि । गच्छ राजन्नितः सूतो वाहुकोऽहमिति ब्रुवन् । समीपमृतुपर्णस्य स हि वैवाक्षनैपुणः । अयोध्यां नगरीं रम्यामद्य वै निषधेश्वर ! । स तेऽक्षहृदयं दाता राजाश्वहृदयेन वै । इक्ष्वाकुकुलजः श्रीमान् मित्रञ्चैव भविष्यति । भविष्यसि यदाक्षज्ञः श्रेयसा योक्ष्यसे तदा । समेष्यसि च दारैस्त्वं मा स्म शोके मनः कृथाः । राज्येन तनयाभ्याञ्च सत्यमेतद्ब्रवीमि ते । स्वंरूपञ्च यदा द्रष्टुमिच्छेथास्त्वं नराधिप ! । संस्मर्त्तव्यस्तदा तेऽहं वासश्चेदं निवासयेः । अनेन वाससाच्छन्नः स्वं रूपं प्रतिपत्स्यसे । इत्युक्त्वा प्रददौ तस्मै दिव्यं वासोयुगं तदा । एवं नलं समादिश्य वासो दत्त्वा च कौरव ! । नागराजस्ततो राजंस्तत्रैवान्तरधीयत” ।

७२अ० “तस्याक्षहृदयज्ञस्य शरीरान्निःसृतः कलिः । कर्कोटकविषं तीक्ष्णं मुखात् सततमुद्वमन्” । ७९अ० । “कर्कोटकस्य नागस्य दमयन्त्या नलस्य च । ऋतुपर्णस्य राजर्षेः कीर्त्तनं कलिनाशनम्” संज्ञायां कन् २विल्वहक्षे पु० राजनि० । ३फललताभेदे (काँकुड) गौरा० ङीष् । “कर्कोटकीफलं कुष्ठहृल्लासारुचिनाशनम् । श्वासकासज्वरान् हन्ति कटुपाकञ्च दीपनम् । ईषद्विभिन्नमरिचैः परिपूर्णगर्भं तैलेन रञ्जिततनुसैन्धवपातयोगम् । वाह्लीकयुक्तपयसा विहिताभिषेकं कर्कोटकीफलमिदं रुचिकृत्सुलभ्यम्”। वैद्यके तद्गुणपाकादि । ४पीतघोषायां स्त्री राजनि० । स्वार्थे कन् अत इत्त्वम् । कर्कोटिका (काकरोल) वृक्षे (काँकुड) ५कुष्माण्डशाञ्च स्त्री राजनि० ।

**कर्कोटवापी** स्त्री कर्कोटनागवासेन कृता वापी । काशीस्थे